॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय २०

ततो वित्रासयन्मर्त्यान्पृथिव्यां राक्षसाधिपः ।
आससाद घने तस्मिन्नारदं मुनिसत्तमम् ॥ १॥

नारदस्तु महातेजा देवर्षिरमितप्रभः ।
अब्रवीन्मेघपृष्ठस्थो रावणं पुष्पके स्थितम् ॥ २॥

राक्षसाधिपते सौम्य तिष्ठ विश्रवसः सुत ।
प्रीतोऽस्म्यभिजनोपेत विक्रमैरूर्जितैस्तव ॥ ३॥

विष्णुना दैत्यघातैश्च तार्क्ष्यस्योरगधर्षणैः ।
त्वया समरमर्दैश्च भृशं हि परितोषितः ॥ ४॥

किं चिद्वक्ष्यामि तावत्ते श्रोतव्यं श्रोष्यसे यदि ।
श्रुत्वा चानन्तरं कार्यं त्वया राक्षसपुङ्गव ॥ ५॥

किमयं वध्यते लोकस्त्वयावध्येन दैवतैः ।
हत एव ह्ययं लोको यदा मृत्युवशं गतः ॥ ६॥

पश्य तावन्महाबाहो राक्षसेश्वरमानुषम् ।
लोकमेनं विचित्रार्थं यस्य न ज्ञायते गतिः ॥ ७॥

क्व चिद्वादित्रनृत्तानि सेव्यन्ते मुदितैर्जनैः ।
रुद्यते चापरै रात्रैर्धाराश्रुनयनाननैः ॥ ८॥

माता पितृसुतस्नेहैर्भार्या बन्धुमनोरमैः ।
मोहेनायं जनो ध्वस्तः क्लेशं स्वं नावबुध्यते ॥ ९॥

तत्किमेवं परिक्लिश्य लोकं मोहनिराकृतम् ।
जित एव त्वया सौम्य मर्त्यलोको न संशयः ॥ १०॥

एवं कुतस्तु लङ्केशो दीप्यमान इवौजसा ।
अब्रवीन्नारदं तत्र सम्प्रहस्याभिवाद्य च ॥ ११॥

महर्षे देवगन्धर्वविहार समरप्रिय ।
अहं खलूद्यतो गन्तुं विजयार्थी रसातलम् ॥ १२॥

ततो लोकत्रयं जित्वा स्थाप्य नागान्सुरान्वशे ।
समुद्रममृतार्थं वै मथिष्यामि रसातलम् ॥ १३॥

अथाब्रवीद्दशग्रीवं नारदो भगवानृषिः ।
क्व खल्विदानीं मार्गेण त्वयानेन गमिष्यते ॥ १४॥

अयं खलु सुदुर्गम्यः पितुराज्ञः पुरं प्रति ।
मार्गो गच्छति दुर्धर्षो यमस्यामित्रकर्शन ॥ १५॥

स तु शारदमेघाभं मुक्त्वा हासं दशाननः ।
उवाच कृतमित्येव वचनं चेदमब्रवीत् ॥ १६॥

तस्मादेष महाब्रह्मन्वैवस्वतवधोद्यतः ।
गच्छामि दक्षिणामाशां यत्र सूर्यात्मजो नृपः ॥ १७॥

मया हि भगवन्क्रोधात्प्रतिज्ञातं रणार्थिना ।
अवजेष्यामि चतुरो लोकपालानिति प्रभो ॥ १८॥

तेनैष प्रस्थितोऽहं वै पितृराजपुरं प्रति ।
प्राणिसङ्क्लेशकर्तारं योजयिष्यामि मृत्युना ॥ १९॥

एवमुक्त्वा दशग्रीवो मुनिं तमभिवाद्य च ।
प्रययौ दक्षिणामाशां प्रहृष्टैः सह मन्त्रिभिः ॥ २०॥

नारदस्तु महातेजा मुहूर्तं ध्यानमास्थितः ।
चिन्तयामास विप्रेन्द्रो विधूम इव पावकः ॥ २१॥

येन लोकास्त्रयः सेन्द्राः क्लिश्यन्ते सचराचराः ।
क्षीणे चायुषि धर्मे च स कालो हिंस्यते कथम् ॥ २२॥

यस्य नित्यं त्रयो लोका विद्रवन्ति भयार्दिताः ।
तं कथं राक्षसेन्द्रोऽसौ स्वयमेवाभिगच्छति ॥ २३॥

यो विधाता च धाता च सुकृते दुष्कृते यथा ।
त्रैलोक्यं विजितं येन तं कथं नु विजेष्यति ॥ २४॥

अपरं किं नु कृत्वैवं विधानं संविधास्यति ।
कौतूहलसमुत्पन्नो यास्यामि यमसादनम् ॥ २५॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com